श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवण्शठकोप श्रीवेदान्तदेशिक यतीन्द्र महादेशिकैरनुगृहीतम्

# ॥ श्रीदयासागरशतकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीदयासागरशतकम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

लक्ष्मीनृसिंहं संपूर्णं वैकुण्ठनिलयं गुरुम्।
नित्यैर्मुक्तैश्च संसेव्यं दयासागरमाश्रये॥ १ ॥

भक्तानां शत्रुहन्तारं भक्तानामभयङ्करम्।
धर्माणां स्थापकं दक्षं दयासागरमाश्रये॥ २ ॥

शत्रुशैलदलद्वज्रं भक्तरक्षणदीक्षितम्।
नन्तृपापदहद्वह्निं दयासागरमाश्रये॥ ३ ॥

स्वर्णच्छायसटायुक्तं स्मितदंष्ट्रं सुरोचिषम्।
सुवर्णवस्त्रसंवीतं दयासागरमाश्रये॥ ४ ॥

लक्ष्मीसंयुक्तवामोरुं लक्ष्म्यालिङ्गितपार्श्वकम्।
लक्ष्म्या दर्शितपादाब्जं दयासागरमाश्रये॥ ५ ॥

तापनीयसुसंवेद्यं सतां तापविमोचनम्।
प्रपन्नाभयदातारं दयासागरमाश्रये॥ ६ ॥

सुपर्णरथमारूढं काङ्क्षितार्थफलप्रदम्।
कल्याणगुणसंपूर्णं दयासागरमाश्रये॥ ७ ॥

मनुष्यदेहिनं कण्ठादूर्ध्वं सिंहमुखोज्ज्वलम्।
अत्यद्भुतं रूपवन्तं दयासागरमाश्रये॥ ८ ॥

शङ्खचक्रादिसंदीप्तं किरीटमकुटोज्ज्वलम्।
सर्वभूषणसंयुक्तं दयासागरमाश्रये॥ ९ ॥

www.prapatti.com

देवदानवसामान्यं देवदानवरक्षकम्।
देवदानवसंसेव्यं दयासागरमाश्रये॥ १० ॥

प्रह्लादरक्षणोद्युक्तं यदृच्छानृहरिं तदा।
स्तम्भेऽवतीर्णं शत्रुघ्नं दयासागरमाश्रये॥ ११ ॥

प्रह्लादप्रार्थनातुष्टं लक्ष्म्या युक्तं तदासने।
पितृदेवार्चितं शान्तं दयासागरमाश्रये॥ १२ ॥

प्रह्लादमभिषिच्याशु सन्तुष्टं भक्तरक्षणात्।
सर्वैश्च संस्तुतं भक्तैर्दयासागरमाश्रये॥ १३ ॥

संवीक्ष्य सर्वान् तत्रस्थान् गच्छन्तं परमं पदम्।
सर्वैः सुरनरैर्दृष्टं दयासागरमाश्रये॥ १४ ॥

आचार्यप्रार्थनाप्रीतमर्चारूपं रमाहरिम्।
अहोबिलेऽवतीर्णं तं दयासागरमाश्रये॥ १५ ॥

देवताराधितं सम्यक् स्मरन्तं लोकपालनम्।
रमावचनसन्तुष्टं दयासागरमाश्रये॥ १६ ॥

यतिरूपधरं पश्चात् चिन्तयन्तं कलौ तदा।
सञ्चारदक्षं सर्वज्ञं दयासागरमाश्रये॥ १७ ॥

आहूय श्रीनिवासार्यं कृत्वा सन्यासिनं गुरुम्।
शङ्खचक्रादिदातारं दयासागरमाश्रये॥ १८ ॥

यतिवर्यं तु तं कृत्वा लोकरक्षणकारणात्।
रमालोलं दत्तवन्तं दयासागरमाश्रये॥ १९ ॥

आदिवण्शठकोपाख्ययतीन्द्रेणार्चितं मुदा।
मालोलं क्षेमदातारं दयासागरमाश्रये॥ २० ॥

मुमुक्षुभिस्तु जिज्ञास्यं मालोलं सर्वकारणम्।
शास्त्रैरेव हि संवेद्यं दयासागरमाश्रये॥ २१ ॥

ज्ञानानन्दमयं बोध्यं रमयाऽऽपद्धनं हरिम्।
हिरण्यनिधिमाश्चर्यं दयासागरमाश्रये॥ २२ ॥

सच्छब्दवाच्यं मासिंहं सङ्कल्पाश्रयमादितः।
उपास्यं सर्वकामेन दयासागरमाश्रये॥ २३ ॥

अनन्तानन्दमाहात्म्यं सर्वानन्दकरं शुभम्।
वाचामगोचरम् प्राप्यं दयासागरमाश्रये॥ २४ ॥

रविमण्डलमध्यस्थं स्वर्णकेशं रमाहरिम्।
पद्मनेत्रं स्वर्णनखं दयासागरमाश्रये॥ २५ ॥

आसमन्तात् काशमानं सर्वकारणकारणम्।
भुक्तिमुक्तिप्रदातारं दयासागरमाश्रये॥ २६ ॥

सर्वप्राणनकर्तारं परमात्मानमीश्वरम्।
रमासिंहं नतार्तिघ्नं दयासागरमाश्रये॥ २७ ॥

स्वदीप्त्या सूर्यनक्षत्रे भासयन्तं सदोज्ज्वलम्।
विशुद्धचित्तसंवेद्यं दयासागरमाश्रये॥ २८ ॥

इन्द्रप्राणतनुं प्राज्ञं सर्वाधारं जगत्पतिम्।
माहरिं प्रणतैः प्राप्यं दयासागरमाश्रये॥ २९ ॥

सर्वात्मकं सदा वन्द्यं सर्वशास्त्ररसायनम्।
रमालोलं शान्तिकरं दयासागरमाश्रये॥ ३० ॥

चराचरं नाशयन्तं मृत्योरपि विनाशकम्।
मृत्युमृत्युं शुभाराध्यं दयासागरमाश्रये॥ ३१ ॥

अक्ष्याधारतयोपास्यं सुखरूपमनामयम्।
रमानृसिंहमद्रीशं दयासागरमाश्रये॥ ३२ ॥

सर्वान्तर्यामिणं सिंहं सर्वलोकनिवासिनम्।
रक्षापेक्षां काङ्क्षमाणं दयासागरमाश्रये॥ ३३ ॥

अदृश्यं सर्वभूतानां दृश्यं मालोलसन्निधौ।
मालोलकल्पकं दीप्तं दयासागरमाश्रये॥ ३४ ॥

वैश्वानरात्मशब्दोक्तं मूर्ध्नाविष्टत्रिविष्टपम्।
लक्ष्मीहरिं त्वर्कनेत्रं दयासागरमाश्रये॥ ३५ ॥

आकाशभूम्याद्याधारं मुक्तप्राप्यं रमाहरिम्।
विद्योतमानं सर्वज्ञं दयासागरमाश्रये॥ ३६ ॥

भूमानं सर्वभूयांसं रमाश्लिष्टतनुं हरिम्।
सर्वकामदुघं श्रेष्ठं दयासागरमाश्रये॥ ३७ ॥

अक्षरं सर्वदाऽभिन्नं श्रिया जुष्टं नतेष्टदम्।
प्रकृतेर्धारकं नित्यं दयासागरमाश्रये॥ ३८ ॥

उपासने कर्मभूतं प्रपत्तौ च रमापतिम्।
चतुर्मुखस्य जनकं दयासागरमाश्रये॥ ३९ ॥

दहराकाशनामानं गुणाष्टकविभूषितम्।
मालोलं हृदयान्तःस्थं दयासागरमाश्रये॥ ४० ॥

अङ्गुष्ठप्रमितं हृद्यं दिव्यमङ्गलविग्रहम्।
मालोलं मनुजैर्ध्येयं दयासागरमाश्रये॥ ४१ ॥

देवैर्वस्वादिभिः सेव्यमादित्याकृतिदेहिनम्।
वस्वादिपददातारं दयासागरमाश्रये॥ ४२ ॥

भक्तियोगविहीनानां शरणागतिकाङ्क्षिणाम्।
मालोलं मुक्तिदं प्रीतं दयासागरमाश्रये॥ ४३ ॥

लीलायै हि जगत् सर्वं स्रष्टारं तु रमापतिम्।
देहिनामन्नदातारं दयासागरमाश्रये॥ ४४ ॥

नताब्राह्मणचण्डालरक्षणे बद्धकङ्कणम्।
रमानरहरिं सेव्यं दयासागरमाश्रये॥ ४५ ॥

सर्वयज्ञसमाराध्यं सर्वयज्ञहविर्भुजम्।
सर्वस्य फलदातारं दयासागरमाश्रये॥ ४६ ॥

अन्नदं वसुदं भद्रं पुत्रदं चार्थिनां सताम्।
मालोलं पद्मपत्राक्षं दयासागरमाश्रये॥ ४७ ॥

गद्यश्रवणसन्तुष्टं पञ्चस्तवकृतादरम्।
रमासल्लापसम्मोदं दयासागरमाश्रये॥ ४८ ॥

नतापदपहर्तारं सर्वानन्दप्रदं सताम्।
रमया चोदितं सम्यक् दयासागरमाश्रये॥ ४९ ॥

विवाहे श्रीनिवासस्य भोक्तारं मन्दिरे शुभे।
रामचन्द्रार्चितपदं दयासागरमाश्रये॥ ५० ॥

गरुडाद्रिगुहावासं वेदान्तद्वयमन्दिरम्।
सर्वकर्मसमाराध्यं दयासागरमाश्रये॥ ५१ ॥

पक्षीन्द्रकरविन्यस्तपादद्वन्द्वं रमाहरिम्।
अर्चायामत्र संसेव्य दयासागरमाश्रये॥ ५२ ॥

आदिवण्शठकोपाख्ययतिवर्येण पूजितम्।
गजाश्वरथसंपन्नं दयासागरमाश्रये॥ ५३ ॥

पत्तनग्रामनगरसञ्चारोत्सुकमादरात्।
मालोलं वसुदातारं दयासागरमाश्रये॥ ५४ ॥

वाञ्छितार्थप्रदातारं वरदाभयशोभितम्।
ऐश्वर्यादि ददच्छ्रीशं दयासागरमाश्रये॥ ५५ ॥

नारायणयतीन्द्रेण पूजितं परया मुदा।
सञ्चारे फलदातारं दयासागरमाश्रये॥ ५६ ॥

पराङ्कुशयतीन्द्रेण विचरन्तं महीतले।
सद्भिस्सम्पूजितं सम्यक् दयासागरमाश्रये॥ ५७ ॥

श्रीनिवासमुनिं पश्चादभिषिच्य मठे शुभे।
नन्दन्तं रमया सार्धं दयासागरमाश्रये॥ ५८ ॥

पञ्चमे रत्नपीठे तु स्थापितेन शठारिणा।
सञ्चरन्तं यतीन्द्रेण दयासागरमाश्रये॥ ५९ ॥

पराङ्कुशेन मुनिना गुहावासाभिलाषिणा।
आराधितं रमालोलं दयासागरमाश्रये॥ ६० ॥

सप्तमे शठकोपेन सर्वतत्त्वार्थवेदिना।
पूजितं गरुडाद्रीशं दयासागरमाश्रये॥ ६१ ॥

पराङ्कुशयतीन्द्रं तं त्वभिषिच्यासने शुभे।
लक्ष्मीनरहरिं प्रीतं दयासागरमाश्रये॥ ६२ ॥

नारायणयतीन्द्रं तं नवमास्थानमण्डनम्।
कृत्वाऽऽनन्देन पूर्णाक्षं दयासागरमाश्रये॥ ६३ ॥

दशमे शठकोपाख्ययतीन्द्रमभिषिच्य च।
पीठे नरहरिं तुष्टं दयासागरमाश्रये॥ ६४ ॥

एकादशास्थानवर्ये श्रीनिवासमुनिं तदा।
अभिषिच्य च सन्तुष्टं दयासागरमाश्रये॥ ६५ ॥

द्वादशास्थानपीठे तु नारायणयतिं पुनः।
अभिषिच्यात्मसन्तुष्टं दयासागरमाश्रये॥ ६६ ॥

त्रयोदशे मठास्थाने वीररघ्वीड्यतिं तदा।
संस्थाप्य मुदमापन्नं दयासागरमाश्रये॥ ६७ ॥

चतुर्दशास्थानपीठे नारायणमुनिं स्थितम्।
संवीक्ष्य तुष्टं मालोलं दयासागरमाश्रये॥ ६८ ॥

कल्याणवीररघ्वीशमभिषिच्य वरासने।
उज्जीवयन्तं सर्वांस्तान् दयासागरमाश्रये॥ ६९ ॥



www.prapatti.com

षोडशास्थानसंयुक्तं शठकोपमुनिं पुनः।
संवीक्ष्य तुष्टहृदयं दयासागरमाश्रये॥ ७० ॥

वीरराघववेदान्तयतिवर्येण पूजितम्।
मालोलं मल्लिकामालं दयासागरमाश्रये॥ ७१ ॥

नारायणयतीन्द्रेण पूजितं पुरुषोत्तमम्।
रमाहरिं त्रयीदीपं दयासागरमाश्रये॥ ७२ ॥

श्रीनिवासयतीन्द्रेण पूजितं कमलाहरिम्।
नताभीष्टप्रदातारं दयासागरमाश्रये॥ ७३ ॥

वीररघ्वीड्यतीन्द्रेण सञ्चरन्तं पुरात् पुरम्।
शिष्यानाप्तांश्च रक्षन्तं दयासागरमाश्रये॥ ७४ ॥

एकविंशेऽभिषिच्याशु पराङ्कुशयतिं तदा।
चोदयन्तं रक्षणाय दयासागरमाश्रये॥ ७५ ॥

नारायणयतीन्द्रेण लोकविख्यातकीर्तिना।
आराधितं रमालोलं दयासागरमाश्रये॥ ७६ ॥

त्रयोविंशास्थानवन्तं वीररघ्वीण्मुनिं शुचिम्।
विचरन्तं पुरस्कृत्य दयासागरमाश्रये॥ ७७ ॥

पराङ्कुशयदूत्तंसावरजेनार्चितं मठे।
रमाहरिं त्रिनेत्रं च दयासागरमाश्रये॥ ७८ ॥

पञ्चविंशे मठास्थाने श्रीनिवासमुनिं शुभे।
स्थापितं वीक्ष्य नन्दन्तं दयासागरमाश्रये॥ ७९ ॥

रङ्गनाथयतीन्द्रेण स्वर्णपुष्पैः समर्चितम्।
सर्वकामप्रदातारं दयासागरमाश्रये॥ ८० ॥

वीरराघववेदान्तयतिवर्यसुसत्कृतम्।
मनःपङ्कजमन्त्रस्थं दयासागरमाश्रये॥ ८१ ॥

रङ्गनाथशठार्याख्ययतिवर्यमनोगतम्।
अन्तिमस्मृतिदातारं दयासागरमाश्रये॥ ८२॥

पराङ्कुशरघूत्तंसावरजेन यतीन्दुना।
स्वर्चितं तु रमालोलं दयासागरमाश्रये॥ ८३॥

श्रीनिवासाख्यवेदान्तयतिवर्यमनोगतम्।
रत्नडोलालसन्मूर्तिं दयासागरमाश्रये॥ ८४॥

श्रीनारायणवेदान्तयतिमानसपङ्कजे।
विहरन्तं रमाकान्तं दयासागरमाश्रये॥ ८५॥

वीररघ्वीड्यतीशानचित्तपङ्कजभास्करम्।
मालोलं सुजनाराध्यं दयासागरमाश्रये॥ ८६॥

शठकोपमुनिश्रेष्ठचित्ततीर्थाभिषेचितम्।
स्मरतां सर्वदातारं दयासागरमाश्रये॥ ८७॥

शठारिरामावरजचित्तदेशपदाम्बुजम्।
सुलभं सर्वभूतानां दयासागरमाश्रये॥ ८८॥

रङ्गनाथयतिश्रेष्ठचित्तागारसुखोषितम्।
सर्वदा सर्वदातारं दयासागरमाश्रये॥ ८९॥

षट्त्रिंशपीठमारूढं श्रीनिवासयतिं जवात्।
दृष्ट्वा सन्तुष्टहृदयं दयासागरमाश्रये॥ ९०॥

वीररघ्वीट्शठारातियतिवर्यार्चितं तदा।
सुप्रीतं तु रमालोलं दयासागरमाश्रये॥ ९१॥

श्रीनिवासशठारातिमनोनयनवर्धनम्।
दुरापं नमतां प्राप्यं दयासागरमाश्रये॥ ९२॥

पराङ्कुशेन यतिना पूजितं चम्पकादिभिः।
सन्तुष्टं रमया सार्धं दयासागरमाश्रये॥ ९३॥

रङ्गनाथशठारातियतिवर्यमनोरथे।
स्थितं मालोलसिंहं तं दयासागरमाश्रये॥ ९४॥

लक्ष्मीनृसिंहशठजिद्यतिराजसमर्चितम्।
सुशीलाचारसन्तुष्टं दयासागरमाश्रये॥ ९५॥

श्रीरङ्गशठकोपश्रीयतिवर्यमनोहरम्।
भाष्यश्रवणसन्तुष्टं दयासागरमाश्रये॥ ९६॥

वीररघ्वीट्शठारातियतीन्द्रे न्यस्तसंपदम्।
परितुष्टरमाश्लिष्टं दयासागरमाश्रये॥ ९७॥

वेदान्तदेशिकाख्येन यतिना संस्तुतं सदा।
आराध्यमानं मालोलं दयासागरमाश्रये॥ ९८॥

अहोबिलं समासाद्य प्रतिष्ठामङ्गलोत्सवम्।
समाप्य लक्ष्म्या संदीप्तं दयासागरमाश्रये॥ ९९॥

गारुडाद्रेः शेषशैलं त्वरयागत्य सानुगैः।
क्रीडन्तं रमया सार्धं दयासागरमाश्रये॥ १००॥

कल्याणश्रीनिवासार्यराघवस्य गृहं ययौ।
स्वयमेव रमाकान्तः दयासागरमाश्रये॥ १०१॥

अनन्तशयनार्येण विद्वद्भिश्च समागतः।
पुलकाङ्कितसर्वाङ्गः कल्याणार्यः समर्चयत्॥ १०२॥

प्रातर्मालोलमाराध्य मध्याह्नाराधनेऽपि च।
तदीयाराधनं कृत्वा सर्वान् समभिपूजयत्॥ १०३॥

सर्वे सन्तुष्टहृदयाः स्तम्भडिम्भागमेन च।
मन्त्राक्षतांश्च संप्राप्य ययुः स्वं स्वं गृहं शुभाः॥ १०४॥

॥ इति श्रीदयासागरशतकं समाप्तम्॥